दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-246 | 1 | जून 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लचतुर्दशी
आषाढः 14 प्रविष्टांशः मङ्गलमयः भवेत्

2 मुख्यमन्त्रिणः घोषणा, 'बड़ा भङ्गाल' क्षेत्रस्य सर्वाभ्यः पात्राभ्यः महिलाभ्यः प्रतिमासं प्राप्स्यन्ते १५०० रूप्यकाणि
3 स्पीतिघाटी-प्राप्ते 'पोटेंटिला अर्जिरोफाइला' पादपे निगूढम् अस्ति स्वास्थ्यरहस्यम्, एतेषु रोगेषु प्रभावकारी
4 हिमाचल-संस्कृत-जगतः देदीप्यमान-सूर्यस्य आचार्य-केशवशर्मणः महाप्रयाणम्; संस्कृतसमाजे शोकतरङ्गः

## प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीय आधिकारिकं प्रवासार्थं सेशल्स-देशस्य 'विक्टोरिया' नगरे सम्प्राप्तः




प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीय प्रवासार्थं सेशल्स-देशस्य राजधान्यां 'विक्टोरिया' नगरे सम्प्राप्तः। सामाजिकान्तर्जालीय प्रेषिते सन्देशे श्रीमोदिना विमानपत्तने सेशल्स-देशस्य राष्ट्रपतिना डॉ. पैट्रिक हर्मिनी इत्यनेन कृत-भव्य स्वागतस्य भूरि-भूरि प्रशंसा विहिता। प्रधानमन्त्रिणा प्रतिपादितं यत्सेशल्स-देशः हिन्दमहासागरे भारतस्य एकः सामुद्रिक सहयोगी दृढः मित्रदेशश्च वर्तते। मोदी अवोचत् यत् सः अस्याः यात्रायाः माध्यमेन उभयोः देशयोः दीर्घकालीन सम्बन्धान् सुदृढीकर्तुं, नागरिक-कल्याणाय सहयोगं वर्धयितुं संवादं प्रति आशान्वितः अस्ति। अनेन सहैव, तेन विमानपत्तने भारतीय-प्रवासी-जनसमूहाय अपि हार्दिक-स्वागतार्थं धन्यतावचांसि ज्ञापितानि, गदितं च यत् भारतीय-प्रवासिभिः यथा स्वसंस्कृतिः संरक्षिता, सा श्लाघनीया अस्ति। अवधेयास्पदं वर्तते यत् प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य ऐतिहासिक पंचाशत् तमस्य स्वतन्त्रता-दिवस-समारोहस्य 'मुख्य अतिथिः' भविष्यति।

## प्रधानमन्त्री अद्य एकादशवादने आकाशवाण्याः 'मन की बात' इति कार्यक्रमे देश-विदेशस्य जनैः सह स्वीयमनोगतं विनिमयी करिष्यति प्रधानमन्त्री




प्रधानमन्त्री नरेन्द्रमोदी अद्य एकादशवादने आकाशवाण्याः 'मन की बात' इति कार्यक्रमे देश-विदेशस्य जनैः सह स्वीयमनोगतं विनिमयी करिष्यति। मासिक-आकाशवाणी-कार्यक्रमस्य अयं पंचत्रिंशदधिकैकशततमो संस्करणो भविता। कार्यक्रमस्यास्य प्रसारणं कृत्स्ने हि आकाशवाणी-दूरदर्शन-जालपुटे, 'एआईआर न्यूज' 'न्यूजऑनएयर' चलदूरभाषीय-तन्त्रांशे च युगपद् भविष्यति। अनेन सहैव, एआईआर न्यूज, डीडी न्यूज, प्रधानमन्त्रि कार्यालयः (PMO) तथा सूचना प्रसारण-मन्त्रालयस्य यूट्यूब-वाहिनीष्वपि अस्य साक्षात्-प्रसारणं भविता। हिन्दी-प्रसारणस्य अनुपदमेव आकाशवाणी अस्य कार्यक्रमस्य अनुवादं क्षेत्रीय-भाषासु अपि प्रसारयिष्यति।

## 'भारत टैक्सी' इत्यस्य आधिकारिकः शुभारम्भः कृतवान् अमितशाहः




केन्द्रीय-गृह-मन्त्री अमितशाहः उदघोषयत् यत् देशस्य सहकारी-यान-आह्वान मञ्चस्य 'भारत टैक्सी' इत्यस्य आगामी-वर्षद्वयाभ्यन्तरे देशस्य नगरेषु क्षेत्रेषु च विस्तारः करिष्यते।'भारत टैक्सी' इत्यस्य आधिकारिक शुभारम्भावधौ मन्त्री अमितशाहः सबलं प्रावोचत् यत् एषः प्रयासः सहकारिता-क्षेत्रे एकः 'क्रान्तिकारि-पदक्षेपो वर्तते। तेन प्रतिपादितं यत् 'भारत टैक्सी' इत्यस्य मुख्यमुद्देश्यम् वर्तते यत् यानचालकाः 'सारथी' इति नाम्ना सम्बोधिताः भविष्यन्ति सहैव साक्षात् अंशधारिणः च भविष्यन्ति। तेभ्यः निष्पक्षं पारदर्शिनं च यातायात मञ्चं प्रदीयते । अमितशाहः प्रत्यपादयत् यत् प्रारूपोऽयं सुनिश्चितं करिष्यति यत् चालकाः स्वकार्याय महत्तमं भागं प्राप्नुयुः, सहैव यात्रिणः अपि सुरक्षित-सुलभ-सेवाभिः उपकृताः भवेयुः।

## तमिलनाडु-राज्ये वाइको इत्यस्य नेतृत्वे एमडीएमके दलेन डीएमके दलेन सह स्वीय नववर्षीयं गठबन्धनं समाप्तम्



तमिळ्नाडुराज्ये वाईको इत्यस्य नेतृत्वे एम्. डी. एम्. के. दलं डी. एम्. के. इत्यनेन सह नववर्षीयं गठबन्धनं समापितवान्। दलस्य सचिवः वाईको वर्यः चेन्नई-नगरे सामान्यपरिषदः सभायाः नेतृत्वं कृतवान्, अपि च सभायां गठबन्धनात् बहिर्गन्तुं सामान्यः प्रस्तावः स्वीकृतः। अवधेयं यत् एम्. डी. एम्. के. दलं सप्तदशाधिक द्विसहस्रतमे वर्षे डी. एम्. के. इत्यस्य नेतृत्वे जाते धर्मनिरपेक्ष-प्रगतिशील-सङ्घटने सम्मिलितः आसीत्। विधानसभायां एम्. डी. एम्. के. दलस्य द्वौ विधायकौ स्तः।

## तमिल-चलच्चित्र अभिनेता निर्देशकः च के. भाग्यराजः चेन्नैयां पंचत्वे विलीनः




प्रख्यातः तमिळ्-चलच्चित्राभिनेता निर्देशकः च के.भाग्यराजः चेन्नई-नगरे दिवङ्गतः। सः त्रिसप्ततिः वर्षीयः आसीत्। प्रख्यातः चलच्चित्रनिर्माता भाग्यराजः चित्ताकर्षक-चित्रकथायाः, विनोदपूर्ण-संवादानां च कृते प्रसिद्धः आसीत्, येन सः तमिळ्-चलच्चित्रजगति अद्वितीयं स्थानम् अवाप्नोत् । तेन पञ्चविंशति-तोप्यधिकानि चलच्चित्राणि निर्देशितानि, प्रायः पञ्चसप्ततिः चलच्चित्रेषु अभिनयं चाकरोत्। उपराष्ट्रपतिः सी पी राधाकृष्णन् वर्यः सुप्रसिद्धस्य चलच्चित्रनिर्मातुः, अभिनेतुः, चित्रकथालेखकस्य च थिरु के भाग्यराजस्य निधने शोकं प्रकटितवान्।

## सुभाषितम्

**शुचित्वं त्यागिता शौर्यं, सामान्यं सुखदुःखयोः।**
**दाक्षिण्यं चानुरक्तिश्च, सत्यता च सुहृद्गुणाः॥**
**(हितोपदेश, मित्रलाभ- ९६)**

अर्थात्- पवित्रता, दानशीलता, शूरता, सुख-दुःख में समानता, अनुकूलता, प्रीति और सत्यता ये अच्छे मित्रों के गुण हैं।






## बैडमिंटनक्रीडा

अमेरिकायाः कैलिफोर्निया-राज्यस्य फुलेर्टन नगरे प्रवृत्तायां 'यू.एस. ओपन' बैडमिंटन प्रतियोगितायाम् भारतस्य देविका सिहागः, रौनक चौहानः च स्व-स्ववर्गेषु विजयम् अवाप्य प्राग्पान्त्य-चक्रे प्रविष्टवन्तौ

## फीफाविश्वचषकस्पर्धा

फीफा विश्वकप स्पर्धायां मिस्र-देशः ईरान-देशेन सह अन्तिमे 'जी' समूहस्य द्वन्द्वे एकं एकं इति अंकैः समता प्राप्य प्रथमतया फीफा विश्वकप स्पर्धायाः 'नॉकआउट' चरणे प्रविष्टः। अस्मिन् द्वन्द्वे ईरान-देशस्य 'रामिन रेजाईन' क्रीडायाः नायकत्वेन उद्घोषितः। अधुना 'राउण्ड ऑफ ३२' चरणे तस्य स्पर्धा ऑस्ट्रेलिया-दलेन सह भविष्यति।

# मुख्यमन्त्रिणः घोषणा, 'बड़ा भङ्गाल' क्षेत्रस्य सर्वाभ्यः पात्राभ्यः महिलाभ्यः प्रतिमासं प्राप्स्यन्ते १५०० रूप्यकाणि






**हिमसंस्कृतवार्ताः- काङ्गड़ा।** मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खुः काँगड़ामण्डलस्य अतिदुर्गमक्षेत्रे 'बड़ा भङ्गाल' प्राप्तवान्, तत्रत्यैः स्थानीयजनैः सह संवादं विहितवान् तेषां समस्याश्च ज्ञातवान्। ठाकुर-सुखविन्दरसिंहसुक्खुः प्रदेशस्य प्रथमः मुख्यमन्त्री भविष्यति, यः अत्र रात्रिप्रवासं विधास्यति। ठाकुर-सुखविन्दरसिंहसुक्खुना जनैः सह संवादकाले ६ बृहत्यः घोषणाः कृताः। तेन 'बड़ा भङ्गाल' क्षेत्रस्य सर्वाभ्यः पात्राभ्यः महिलाभ्यः 'इन्दिरा गान्धी प्यारी बहना सुख सम्मान निधि योजना' इत्यस्याः अन्तर्गतं १५०० रूप्यकाणि प्रतिमासं प्रदातुं घोषणा कृता। अस्मिन् दुर्गमक्षेत्रे २४ घण्टाः (अहोरात्रं) विद्युदापूर्तये 'जनरेटर सेट' (विद्युदुत्पादकयन्त्राणि) स्थापयिष्यन्ते। तेन कथितं यत् 'बड़ा भङ्गाल' क्षेत्रस्य विद्यालयीयच्छात्रेभ्यः उच्चशिक्षां निरन्तरं कर्तुं प्रोत्साहनराशिः (इंसेंटिव) प्रदास्यते। अस्य क्षेत्रस्य समीपस्थान् विद्यालयान सर्वकारः 'नोडल' विद्यालयान विधास्यति, येन बीड़-इत्यादिषु क्षेत्रेषु गत्वा अत्रत्याः बालकाः विद्यालयीयां शिक्षां ग्रहीतुं शक्नुयुः।मुख्यमन्त्रिणा अधिकारिणः 'बड़ा भङ्गाल' क्षेत्रम् 'इको टूरिज्म' (पारिस्थितिक-पर्यटन) रूपेण विकसितुं निर्देशिताः, सद्यः एव विस्तृतां कार्ययोजनां निर्मातुं च कथितम्। तेन प्रतिपादितं यत् क्षेत्रे प्राकृतिककृष्या उत्पादितस्य राजमाषस्य (राजमाह) उपरि सर्वकारः न्यूनतमसमर्थनमूल्यं प्रदास्यति। मुख्यमंत्री कृषिविभागस्य अधिकारिणः 'बड़ा भङ्गाल' क्षेत्रस्य जनान् प्राकृतिककृष्या सह संयोजितुं तदर्थं च सर्वाः सुविधाः प्रदातुं निर्देशितवान्। अस्य क्षेत्रस्य मेषपालकेभ्यः मुख्यमन्त्रिणा महती घोषणां कुर्वन् उक्तं यत् राज्यसर्वकारः मेषपालकेभ्यः उचितमूल्ये मांसस्य क्रयणं विधास्यति। मुख्यमन्त्रिणा क्षेत्रवासिनः आश्वस्ताः कृताः यत् राज्यसर्वकारः तेषां जीवनं सुगमं विधातुं सर्वं सम्भवं पदक्षेपं प्रप्स्यति। तेन क्षेत्रस्य प्रवासं कृत्वा आपदावेलायां संजातायाः क्षतेः आकलनम् अपि गृहीतम्। तेन कठिनेषु परिस्थितिषु जीवनयापनं कुर्वताम् स्थानीयजनानाम् अनुभवाः साक्षात् ज्ञाताः। उल्लेखनीयं वर्तते यत् वर्ष २०११ तः परं प्रदेशस्य केनापि मुख्यमन्त्रिणा 'बड़ा भङ्गाल' क्षेत्रस्य प्रवासः न कृतः आसीत्। अस्मिन् अवसरे विधायकः किशोरीलालः अपि उपस्थितः आसीत्।

# कृषकेभ्यः साहाय्यम्, प्रलम्बित-कृषिऋणस्य उपरि ५० प्रतिशतं व्याजभारं वक्ष्यति सर्वकारः- मुख्यमन्त्री सुक्खुः

हिमसंस्कृतवार्ताः- शिमला।कृषकेभ्यः महतीं सहायतां प्रदातुं राज्यसर्वकारेण आयव्ययके कृतां एकाम् महत्त्वपूर्णां घोषणां पूरयित्वा 'वन टाइम सेटलमेंट पॉलिसी' (एकमुश्त निस्तारण नीति) इत्यस्यान्तर्गतं कृषिऋण- ब्याज-सहायतायोजना (कृषि लोन ब्याज सब्सिडी योजना) आरब्धुं निर्णयः विहितः। एषा योजना तेषां कृषकाणां साहाय्यं विधास्यति, येषां कृषियोग्या भूमिः ऋणस्याप्रदानेन निविदाप्रक्रियायाः सङ्कटे वर्तते। कृषकाणां हिताय अस्य प्रक्रमस्य अन्तर्गतं सर्वकारः प्रति कृषकं लक्षत्रयं (३,००,०००) रूप्यकाणि यावत् कृषिऋणस्य प्रलम्बितव्याजस्य ५० प्रतिशतं भागं स्वयम् उद् वक्ष्यति। अनया योजनया राज्ये प्रायः ६,३५६ कृषकाः लाभान्विताः भविष्यन्ति इति आशा अस्ति। एतदर्थं ५० कोटिरूप्यकाणां बजटप्रावधानं कृतम् अस्ति। एषा योजना 'हिमाचलप्रदेश राज्य सहकारी कृषि एवं ग्रामीण विकास बैंक' तथा च 'कांगड़ा सहकारी कृषि एवं ग्रामीण विकास बैंक' इत्यनयोः माध्यमेन प्रवर्तयिष्यते। सम्बद्धाः शाखाः व्याजसहायतायाः लाभाय पात्राणां ऋणग्रहीतृणां (कर्जदारों की) परिचयं कृत्वा तेषां सूचीं सज्जीकरिष्यन्ति। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना कथितं यत् कृषकाः राज्यस्य अर्थव्यवस्थायाः मेरुदण्डाः सन्ति, तेषां कल्याणं च सर्वकारस्य सर्वोपरि प्राथमिकता वर्तते। तेन उक्तं यत् बहवः कृषकाः कठिनासु परिस्थितिषु आर्थिकआह्वानानां सम्मुखीकरणं कुर्वन्तः सन्ति, अतः सर्वकारेण पात्रलाभार्थिभ्यः एतत् एकमुश्त-साहाय्यं प्रदातुं निर्णयः विहितः।अस्यां योजनायां ते कृषकाः सम्मिलिताः भविष्यन्ति, येषां कृषिऋणस्य समयसीमा समाप्ता संजाता, येषां च भूमिः वित्तीयसंस्थानां पक्षतः निविदायाः सङ्कटे अस्ति। प्रलम्बितव्याजस्य अर्धं भारं वहित्वा सर्वकारस्य उद्देश्यं ऋणस्य नियमितीकरणे साहाय्यं प्रदानं, आर्थिकतनावस्य न्यूनीकरणं, कृषकाणां स्वभूमिहानिभयं विना कृषिं निरन्तरं कर्तुं सक्षमीकरणं च वर्तते। मुख्यमन्त्रिणा सम्बद्धाः विभागाः वित्तीयसंस्थाश्च निर्देशिताः यत् ते एतां योजनां तीव्रगत्या प्रवर्तयन्तु, येन निर्धनेभ्यः कृषकेभ्यः समये साहाय्यं प्राप्येत। मुख्यमन्त्रिणा प्रतिपादितं यत् कृषकान् आर्थिकदैन्यात् रक्षितुं, स्थायिविकासाय कृषिक्षेत्रं सुदृढीकर्तुं सर्वः सम्भवः प्रयासः क्रियमाणः वर्तते। तेन कथितं यत् सर्वकारः सम्पूर्णे राज्ये प्राकृतिककृषिं प्रोत्साहयति, प्राकृतिकरूपेण उत्पादितसस्यानां कृते ऐतिहासिकं समर्थनमूल्यं च ददाति। एषः प्रक्रमः न केवलम् उपभोक्तृभ्यः रसायनमुक्तं धान्यं प्रापयति, अपि तु ग्रामीण- अर्थव्यवस्थायाः सुदृढीकरणे कृषकाणाम् आयवर्धने च महत्त्वपूर्णं योगदानं यच्छति। मुख्यमन्त्रिणा अवदत् यत् सर्वकारः कृषकाणां हितानां रक्षां कर्तुं हिमाचलप्रदेशे कृषेः समृद्धये सुदीर्घकालस्थायित्वाय च अनुकूलवातावरणस्य निर्माणाय कटिबद्धः अस्ति।

# अमेरिका-देशस्य विदेशमन्त्री मार्को रुबियो प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य भूरि-भूरि प्रशंसां अकरोत्



अमेरिका-देशस्य विदेशमन्त्री मार्को रुबियो प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य भूरि-भूरि प्रशंसां अकरोत्। तेनोदीरितं यत् भारतेन उल्लेखनीयः आर्थिक विकासः कृतः, सहैव देशोऽयं सम्प्रति वैश्विक मञ्चे इतोऽपि महतीं भूमिकां निर्वहति। वाइट हाउस् इत्यत्र वार्ताहरैः सह संवादक्रमे रुबियो स्पष्टीकृतवान् यत् 'ट्रम्प-प्रशासनं' भारतं संयुक्तराज्य अमेरिकायाः अत्यन्तं निकटतमेषु रणनीतिक-सहयोगिषु अन्यतमं मन्यते। तेन प्रतिपादितं यत् प्रधानमन्त्रिणः मोदिनः कुशल नेतृत्वे भारतं दृढं आर्थिक लाभं प्राप्नुवद् अस्ति, सहैव प्रभावशाली-वैश्विक-शक्तित्वेन समुदेति। रुबियो एतदपि संसूचयत् यत् प्रधानमन्त्रिणः मोदिनः राष्ट्रपति डोनाल्ड ट्रम्पस्य च सम्बन्धः अतीव घनिष्ठो वर्तते, यः कूटनीति-दृष्ट्या अतीव महत्त्वपूर्णः अस्ति।

# प्रधानमन्त्रि-सङ्ग्रहालय-पुस्तकालयेनाद्य पूर्व-प्रधानमन्त्रिणः पी. वी. नरसिंह रावस्य पंचाधिकैकशततमजन्मजयन्त्यावसरे तस्य जीवनं-न्यासं च अभिलक्ष्य एका प्रदर्शिनी समायोजिता



प्रधानमन्त्रि-सङ्ग्रहालय-पुस्तकालयेनाद्य पूर्व-प्रधानमन्त्रिणः पी. वी. नरसिंह रावस्य पंचाधिकैकशततमजन्मजयन्त्यावसरे तस्य जीवनं-न्यासं च अभिलक्ष्य एका प्रदर्शिनी समायोजिता। अस्याः प्रदर्शिन्याः उद्घाटनं पीएमएमएल कार्यकारी परिषदः अध्यक्षेण नृपेन्द्र मिश्रेण विहितम्, तदनन्तरं 'प्रधानमन्त्रि सङ्ग्रहालये' आगंतुकानां कृते इयं मुक्ता कृता। अस्यां प्रदर्शिन्याम् पी. वी. नरसिंह रावस्य सार्वजनिक-जीवनस्य उत्कृष्टायाः यात्रायाः संस्मरणानि, दुर्लभानि छायाचित्राणि, आधिकारिक प्रपत्राणि, भाषणानि, अभिलेखीय-सामग्र्यश्च प्रदर्शिताः सन्ति।



# स्पीतिघाटी-प्राप्ते 'पोटेंटिला अर्जिरोफाइला' पादपे निगूढम् अस्ति स्वास्थ्यरहस्यम्, एतेषु रोगेषु प्रभावकारी



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य स्पीतिघाट्यां कश्चन तादृशः पादपः सम्प्राप्तः, यस्मिन् स्वास्थ्यस्य महन्निधानं निहितम् अस्ति। रजत-नैनोकणैः युक्ते अस्मिन् पादपे जीवाणुरोधिनः, एण्टी- ऑक्सीडेण्ट- गुणाः च प्राप्ताः, ये मधुमेहसदृशाणां रोगिणां कृते रामवाणसदृशाः सिद्धाः भवितुं शक्नुवन्ति। हिमाचलप्रदेशविश्वविद्यालयस्य, बिलासपुर-महाविद्यालयस्य, महाराजा- अग्रसेन-विश्वविद्यालयस्य च संयुक्ते अन्वेषणे अयं खुलासा जातः। शोधदलेन स्पीतिघाट्याः कुञ्जुमदर्रा-क्षेत्रात् 'पोटेंटिला अर्जिरोफाइला' नामकस्य पादपस्य प्रतिदर्शाः एकत्रिताः। अस्य पादपस्य उपयोगः आयुर्वेदे, सिद्ध-चिकित्सायां, सोवा-रिग्पा-सदृशीषु पारम्परिक-चिकित्सापद्धतिषु भवति। अस्मिन् एण्टी- ऑक्सीडेण्ट, रोगाणुरोधी, अल्फा- एमाइलेज- अवरोधकगुणाः च विद्यन्ते। पादपस्य अर्कात् निर्मिताः हरित-रजत-नैनोकणाः उल्लेखनीयं प्रभावं प्रदर्शितवन्तः। एते नैनोकणाः विभिन्न-रोगजनकानां विरुद्धं सामान्य-अर्कात् अपेक्षया श्रेष्ठं परिणामं दत्तवन्तः। इदम् अन्वेषणं भविष्ये नूतनानाम् औषधानां विकासाय मार्गं प्रशस्तं कर्तुं शक्नोति। रजत-नैनोकणैः अनेक- रोगजनकानां विरुद्धं प्रभावी कार्यं कृतम्। एतेषु स्ट्रेप्टोकोकस म्यूटान्स, ई. कोलाई, बैसिलस सेरियस, कैंडिडा एल्बिकन्स च सम्मिलिताः सन्ति। एते नैनोकणाः एतेषां रोगजनकानां विरुद्धं सामान्यपादप-अर्कात् अधिकक्षमतां प्रदर्शितवन्तः। इदं शोधं जैव-चिकित्साक्षेत्रे महत्त्वपूर्णं भवितुं शक्नोति। पारम्परिक- चिकित्सापद्धतिषु 'पोटेंटिला अर्जिरोफाइला' वनस्पतेः दीर्घः इतिहासः अस्ति। अनेन शोधेन एतेभ्यः पारम्परिक-दावेभ्यः वैज्ञानिकः आधारः प्रदत्तः। अल्फा-एमाइलेज-अवरोधकगुणाः मधुमेहप्रबन्धने अस्य सम्भावितभूमिकां दर्शयन्ति।

## हिमालयीक्षेत्रस्य वनस्पतीनां संरक्षणाय प्रोत्साहनम्

अस्य अन्वेषणस्य शोधपत्रे स्थानं दत्तम् अस्ति। अयं अध्ययनः मार्च २०२६ तमे वर्षे प्रतिष्ठित-वैज्ञानिक- पत्रिकायां 'केमिस्ट्री सेलेक्ट' इत्यस्यां प्रकाशितः अभवत्। इदं शोधपत्रं ज्योति राणा, आनन्द सागर, जागृति राणा, संजीव कुमार इति विशेषज्ञैः सज्जीकृतम्। अयं अध्ययनः हिमाचलप्रदेश- विश्वविद्यालयस्य (शिमला) जैवविज्ञानविभागे सम्पन्नः। महाराजा- अग्रसेन-विश्वविद्यालयस्य (सोलन) मूलभूत- अनुप्रयुक्त-विज्ञानशालायाः, राजकीयमहाविद्यालयस्य (बिलासपुर) वनस्पतिविज्ञानविभागस्य शोधकर्तारः अपि अस्य दलस्य भागाः आसन्। अयं बहु-संस्थागत- सहयोगः हिमालयीक्षेत्रस्य वनस्पतीनां संरक्षणं प्रवर्धयिष्यति।
हिमाचलप्रदेशे बहवः औषधीयाः पादपाः सन्ति। केवलं तेषां अभिज्ञानस्य आवश्यकता वर्तते। एतेषां पादपानां उपयोगः औषधनिर्माणाय क्रियते। स्पीतिघाट्यां प्राप्यमाणः 'पोटेंटिला अर्जिरोफाइला' नामकः पादपः आयुर्वेदिक-औषधनिर्माणाय उपयोगे आनेष्यते। आयुर्वेदविभागस्य दलं विषयेऽस्मिन् विस्तृतं विवरणं सङ्ग्रहीष्यति।"

- यादवेन्द्र गोमा, आयुष-मन्त्री, हिमाचलसर्वकारः

# भारतेन परमाणु-रिएक्टर-जनित-ऊष्मणः उपयोगं कृत्वा विश्वस्य प्रथमं हाइड्रोजन-उत्पादन-केन्द्रं विकसितम्



परमाणु-ऊर्जा-विभागस्य सचिवः अजीत कुमार मोहन्ती महोदयः तमिलनाडु-राज्यस्य कल्पक्कम-स्थिते 'इन्दिरा गान्धी परमाणु अनुसन्धान केन्द्र' (IGCAR) इत्यत्र विश्वस्य प्रथमस्य हाइड्रोजन-उत्पादन-केन्द्रस्य उद्घाटनम् अकरोत्। एतत् संयन्त्रं 'फास्ट ब्रीडर टेस्ट रिएक्टर' (FBTR) इत्यस्मात् प्राप्तेन परमाणु-ऊष्मणा 'कॉपर-क्लोरीन' (Cu-Cl) ताप-रासायनिक-प्रक्रियया संचालितं भवति।डॉ. मोहन्ती महोदयः अवदत् यत् हाइड्रोजन सदृशैः उभरद्भिः (नवीनैः) स्वच्छ-ऊर्जा-प्रौद्योगिकीभिः सह परमाणु-ऊर्जायाः एकीकरणं सतत-ऊर्जा-भविष्यस्य दिशि एकं महत्त्वपूर्णं पदम् अस्ति। सः अकथयत् यत् परमाणु-ऊर्जा कार्बन-मुक्तां विश्वसनीयां च विद्युतं प्रदातुं क्षमतां धरति। एषा बृहत् परिमाणे (विशालस्तरे) हाइड्रोजन-उत्पादनाय उपयुक्ता अस्ति।एषा उपलब्धिः उन्नतायां परमाणु-प्रौद्योगिक्यां स्वच्छ-ऊर्जा-प्रणालीषु च भारतस्य वर्धमानां क्षमतां प्रदर्शयति। एतत् हाइड्रोजन-उत्पादन-केन्द्रं 'भाभा परमाणु अनुसन्धान केन्द्र' (BARC) इत्यनेन स्वदेशीयरूपेण विकसितं कृतम् अस्ति।

# जनादेशात् भीतः सर्वकारः, अध्यक्ष-उपाध्यक्षयोः निर्वाचनं स्थगित्वा अश्वविक्रयणस्य (हॉर्स ट्रेडिंग) प्रयासः -जयरामठाकुरः

हिमसंस्कृतवार्ताः- शिमला। प्रतिपक्षनेता जयरामठाकुरः शनिवासरे शिमलायां आयोजितायां पत्रिकायोगगोष्ठ्यां काङ्ग्रेससर्वकारस्य उपरि लोकतन्त्रस्य दलनं, जनादेशस्य अपमानं, सर्वकारीयतन्त्रस्य दुरुपयोगं कृत्वा पञ्चायत- नगरनिकाय-निर्वाचनानां परिणामान् प्रभावितुम् आरोपं कृतवान्। तेन कथितं यत् काङ्ग्रेससर्वकारः पूर्वं येन केन प्रकारेण निर्वाचनं स्थगयितुम् इच्छति स्म, परन्तु उच्चन्यायालयस्य अन्ततः सर्वोच्च- न्यायालयस्य च हस्तक्षेपात् परं निर्वाचनानि कारणीयानि अभवन्। एतदतिरिच्य सर्वकारः अधुना अध्यक्ष-उपाध्यक्षयोः निर्वाचनं जानन् एव विलम्बयति, येन अश्वविक्रयणाय जनप्रतिनिधीनां उपरि च प्रभावं स्रष्टुं समयः प्राप्तुं शक्येत। जयरामठाकुरः अवदत् यत् काङ्ग्रेससर्वकाराय पूर्वमेव आशङ्का आसीत् यत् जनता तस्य विरोधे मतदानं विधास्यति। एतदेव कारणम् आसीत् यत् कदाचित् आपदाप्रबन्धन-अधिनियमस्य आश्रयः गृहीतः, कदाचित् नियमेषु परिवर्तनानि कृतानि, कदाचित् च निर्वाचनप्रक्रिया बाधिता कर्तुं प्रयासः विहितः। सर्वोपरि-न्यायालयस्य निर्देशानन्तरं निर्वाचनानि तु अभवन्, परन्तु अधुना सर्वकारः जनादेशं स्वीकर्तुं स्थाने लोकतान्त्रिकप्रक्रियां रोद्धुं संलग्नावर्तते।



## १२ जिलापरिषत्सु केवलं त्रिषु एव निर्वाचनानि कारितानि

तेन प्रतिपादितं यत् पञ्चायतनिर्वाचनेषु प्रायः ७० प्रतिशतं पञ्चायतेषु भाजपा-समर्थिताः प्रधानाः उपप्रधानाश्च विजिताः अभवन्, यत् स्पष्टः सङ्केतः अस्ति यत् प्रदेशस्य जनतया काङ्ग्रेससर्वकारः नाङ्गीकृतः। तेन उक्तं यत् नगरनिकायनिर्वाचनेष्वपि भाजपादलाय व्यापकं जनसमर्थनम् अलभत। धर्मशाला-नगरनिगमे भाजपेति दलेन १७ आसनेषु ११ आसनानि जित्वा स्पष्टं बहुमतं प्राप्तं, यत्रैव अन्येषु नगरनिकायेष्वपि भाजपायाः प्रदर्शनं काङ्ग्रेसदलात् श्रेष्ठतरम् आसीत्। जयरामठाकुरः अवदत् यत् १२ मण्डलपरिषत्सु केवलं त्रिषु एव अध्यक्ष-उपाध्यक्षयोः निर्वाचनानि कारितानि सन्ति, त्रिष्वपि स्थानेषु काङ्ग्रेसदलं स्वप्रत्याशिनम् अपि प्रस्थापयितुं न शक्नोत्। तेन पक्षं कृतं यत् शिष्टासु अधिकांशजिलापरिषत्सु अपि भाजपासमीपे स्पष्टं बहुमतं वर्तते, परन्तु सर्वकारः जानन् एव निर्वाचनानि न कारयति।

# हिमाचल-संस्कृत-जगतः देदीप्यमान-सूर्यस्य आचार्य-केशवशर्मणः महाप्रयाणम्; संस्कृतसमाजे शोकतरङ्गः

संस्कृतजगतः सुविख्यातानां विदुषां आदरणीयानां पूज्यगुरुवर्याणाम् आचार्य-केशवरामशर्मा-महोदयानां देहावसानं जून-मासस्य षड्विंशतितमे (२६) दिनाङ्के तेषां निवासस्थाने सोलननगरे अभवत्। अस्मिन् अवसरे सम्पूर्णे संस्कृतसमाजे शोकतरङ्गः प्रसरिता।हिमाचलस्य संस्कृतविद्वत्सु मूर्धन्याः आचार्य-केशवशर्मणः यदि 'हिमाचलस्य कालिदासः' इति उच्येरन्, तर्हि एषा अतिशयोक्तिः न भविष्यति। तेषाम् अप्रतिमया काव्यलेखनप्रतिभया हिमाचलस्य गौरवं वर्धितम्, येन कारणेन हिमाचलसर्वकारेण वर्षे २०२४ (द्विसहस्र-चतुर्विंशति) तमे वर्षे ते 'हिमाचलगौरवम्' इति सम्मानेन सम्मानिताः आसन्।आचार्याणां यशः न केवलं हि हिमाचले अपितु काश्याः साहित्यिकगोष्ठीषु अपि गुञ्जति स्म। आचार्यमहोदयैः अनेके संस्कृतपुरोधासः (विद्वांसः) सज्जीकृताः। अद्य तेषां शतादिकाः शिष्याः तेषां निर्दिष्टमार्गे चलन्तः संस्कृतस्य सेवां कुर्वन्तः सन्ति। संस्कृतसमाजे यदा तेषां देहावसानस्य समाचारः प्राप्तः, तदा अनेकेषां संस्कृतविदुषां कण्ठेभ्यः शोकस्य उद्गाराः उद्भासिताः, यान् 'हिमसंस्कृतवार्ता' इत्यनया सङ्कलिताः।

*अस्माकं श्रद्धेयाः ब्रह्मर्षयः गुरुदेवाः अद्य ब्रह्मलीनाः अभवन्। अन्तर्राष्ट्रियख्यातिलब्धाः संस्कृतविद्वांसः, महामहोपाध्यायाः, 'अभिनवकालिदासः', 'श्रीहर्षः' इति उपाधिधारिणः, राष्ट्रपतिना सम्मानितवर्याः, अनेकेषां कालजयीग्रन्थानां रचितारः आचार्याः/प्रो. केशवरामशर्माणः स्वर्गारोहणम् अकुर्वन्। अनेन समस्तरूपेण संस्कृतसमाजः शोकमग्नः जातः अस्ति-*

***-डॉ.प्रेमलाल गौतमः, सोलनम्***

*अतीव दुःखदः समाचारः, संस्कृतजगतः कृते च एषा महती (अपूरणीया) क्षतिः अस्ति। एतादृशाः महात्मानः विरलाः एव भूमौ जन्म गृह्णन्ति। भगवान् पुण्यात्मानं स्वकीयेषु श्रीचरणेषु स्थानं प्रयच्छतु-*

***आचार्यः सुभाषः***

*कथं लिखामि? कथं कथयामि? स्तब्धोऽस्मि, निःशब्दोऽस्मि। किं परमश्रद्धेयाः सद्गुरुवर्याः सत्यमेव स्वकीयां सांसारिक-दैहिक-यात्रां समाप्य ईश्वरस्य चरणकमलेषु विलीनाः अभवन्? मनः एतत् स्वीकारोतुं सिद्धं नास्ति। निष्प्राणो (मृतात्मा) भूत्वा इदं लेखनीयं भवति यत् आधुनिक-संस्कृतजगतः मूर्तिमान् कवीश्वराः परमश्रद्धेयाः गुरुवर्याः गोलोकवासिनो भूत्वा अस्मात् नश्वरात् संसारात् महाप्रयाणम् अकुर्वन्। परमपिता परमेश्वरः तेभ्यः शाश्वतीं शान्तिं प्रयच्छतु। सहैव, पूज्याभ्यः मातृवर्याभ्यः, परिवारजनेभ्यः, समस्ताय संस्कृत-समुदायाय च एतत् दारुणं दुःखं सोढुं शक्तिं प्रददातु। 'हिमाचल-संस्कृत-मनीषि-मण्डलम्' दुःखस्य एतस्यां घट्यां तेषाम् आत्मीयजनानां दुःखे सम्मिले (सहभागी) अस्ति- **डॉ. सुरेशभारद्वाजः शिमला***

अहो! अतीव हृदयविदारकः (समाचारः अयम्)। मम काव्यनायकाः अद्य ब्रह्मलीनाः अभवन्, विश्वासः एव न भवति। हे ईश्वर! कीदृशी इयं लीला? काव्यजगतः देदीप्यमानः दिवाकरः (सूर्यः) अद्य अस्तं गतः। एषा महती दुःखदा घटना अस्ति, (परन्तु) ईश्वरस्य इच्छायाः नियमव्यवस्थायाः च पुरतः वयं नतमस्तकाः स्मः। ईश्वरः दिवङ्गताय पुण्यात्मने शान्तिं सद्गतिं च प्रदातुं प्रार्थ्यते। ओम् शान्तिः शान्तिः शान्तिः

येन व्यलेखि बहुला वरकाव्यमाला
यन्मेधया च कवयो मुदुदधौ निमग्नाः।
गीर्वाणवाक् प्रमुदितापि च यत् कृतीभिः
यत्कीर्तिरूर्जयति वाग्मिवरान्तरिक्षे ।।1
श्रीमान्स केशववरो निजजीवनस्य



यात्रां प्रपूर्य सुरलोकमहो प्रयातः।
हा सांस्कतं जगदहो व्यथितं ददामि
श्रद्धांजलिं सविनयं विबुधाय तस्मै ।।2
**मनोहरलाल आर्यः हरिद्वारतः**

महती अपूरणीया क्षतिः । देदीप्यमानः संस्कृत - जगतः भास्करः अस्तङ्गतः । ॐ शान्तिः-

**डॉ.कुमारसिंहसिसोदिया,सोलनम्**

*संस्कृतजगतः देदीप्यमानाः सूर्याः, संस्कृतज्ञानां गर्वोन्नत-उत्तमाङ्गाः (गौरवस्वरूपाः) आचार्याः केशवमहोदयाः। तेषाम् अकस्मात् स्वर्गारोहणं संस्कृतसमाजस्य कृते एका अपूरणीया क्षतिः अस्ति। ईश्वरः भवद्भ्यः (पुण्यात्मने) विदेहमोक्षं प्रददातु, इति एतादृशी प्रार्थना अस्ति*

***- डॉ.लीलाधरवात्सायनः***

"हिमाचल-संस्कृतजगतः सूर्यस्य अवसानम् अभवत्।" परमश्रद्धेयानां गुरुवर्याणां महाप्रयाणेन मनः अतीव व्यथितम् (दुःखितं) अस्ति। भवताम् एषा काव्य-कृतिः (काव्ययशाः) सर्वदा अमरा स्थास्यति। परमपिता परमेश्वरः पवित्रां तां पुण्यात्मानं स्वकीयेषु श्रीचरणेषु शाश्वतं स्थानं सद्गतिं च प्रददातु इति

**- डॉ.दिनेशः ठियोगः**

अस्तं गतो महासूर्यः संस्कृतज्ञ-शिरोमणिः।
काव्यकीर्तिः स्थिरा लोके तस्यैव चामरा सदा॥
ईश्वरस्य पदे रम्ये शाश्वतं स्थानमाप्नुयात्।
सद्गतिं च परां पुण्या लभतामूर्ध्वरेतसः॥
**- डॉ.अमनदीप शर्मा, हिमसंस्कृतवार्ता**

उत्तुङ्गमुत्तमाङ्गं यत् संस्कृतज्ञ-शिरोमणिः।
- अस्तं गतः स सविता शोकसागर-मज्जनम्॥
विदेहमोक्षं सम्प्राप्य दिव्यलोके महीयताम्। तस्यैव चरणाम्भोजे प्रार्थयामो जगद्गुरुम्॥
**डॉ.मनोजशैलः, हिमसंस्कृतवार्ता**

संस्कृतजगति सर्वेषां श्रद्धास्थानं शिष्यवत्सलः प्रदेशस्य गौरवः महमहोपाध्यायः आचार्यकेशवरामशर्मा अद्य स्थूलशरीरं विहाय दिवङ्गतः। परिषद् सश्रद्धं श्रद्धाञ्जलिं समर्पयति। ॐ शान्तिः शान्तिः शान्तिः।।विद्यानिधिर्महाप्राज्ञः कालिदासोऽभिनवः कृती। केशवरामशर्मा हि प्राप्य लोकं परं गतः॥

**– डॉ.कमलकान्तगौतमः, संस्कृतशिक्षकपरिषद्**

*जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। आचार्योऽपि देहं त्यक्त्वा गतो ब्रह्मसनातनम् ॥ न शोचितुं युक्तमिदं धीराणां तत्त्ववेदिनाम्। ॐ शांति शांति शांतिर्भूयात् दिवंगताय धीमते ॥*

***डॉ.सन्दीपशर्मा***

# "विनोदकणिका"

{१} मातृगृहतः भार्यायाः दूरवाणी आगता, रक्षाबन्धनं समाप्तम्, अधुना माम् उद्धृत्य आगच्छ। पतिः- प्रिये! १५ अगस्तपर्यन्तम् अवकाशः अस्ति तर्हि द्वौ वा चत्वारि दिनानि इतोऽपि मातृगृहं तिष्ठतु। भार्याः- चतुरः मा भवतु! देशः स्वतन्त्रः अभवत्, न त्वम्।

{२}औषधविक्रेता क्रुद्धः भूत्वा अवदत्- अग्रिमे समये भवान् अवसादस्य औषधं क्रेतुम् इच्छति तर्हि वैद्यस्य चिटिका आनयतु। न तु विवाहप्रमाणपत्रम्।

**डा. वर्षा प्रकाश टोणगांवकर,पुणे / महाराष्ट्रम्©**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। किं त्वया श्रुतम्? अमेरिकायाः टेक्सासदेशे 'ग्रेसी'-नाम्नी चित्रोष्ट्री स्व-गृहात् पलायिता आसीत्। सुदीर्घ-अन्वेषणस्य अनन्तरं सा कुशलिनी प्राप्ता।
**काव्या-** सत्यम्, सा चित्रोष्ट्री बहु चतुरतापूर्वकं विहृतवती अस्ति। सा सुरक्षिता प्राप्ता इति वार्ता मम मनसि हर्षं जनयति। अपरपक्षे, आस्ट्रेलियादेशे विवाहोत्सवे वरवधूभ्यां कुलनाम-निश्चयार्थम् एकः विचित्रः मार्गः आश्रितः। ताभ्यां कुलनाम-निश्चयार्थं क्रीडा-प्रतियोगिता आयोजिता। यस्य परिवारः विजयी जातः, तस्यैव कुलनाम स्वीकृतम्।
**नन्दिनी-** कुलनाम-सङ्ग्रामः तु अतीव विनोदपूर्णः जातः! विवाहे एतादृशं क्रीडनम् आनन्दकरं भवति। पश्य, आङ्ग्ल-देशे अन्यत् अद्भुतं कार्यं कृतम्। लक्षत्रयाधिकैः क्रीडनक-खण्डैः एका पूर्णाकारा वेगगामि-कार-मञ्जूषा निर्मिता। सा मञ्जूषा प्रतिघण्टम् एकादशाधिक- शत- किलोमीटरवेगेन चालिता!
**काव्या-** क्रीडनक-वाहनेन एतादृशः वेगः प्राप्तः इति तु आश्चर्यकरम् एव! मनुष्यस्य बुद्धिः अद्वितीया अस्ति। अन्ते च, भारतदेशस्य बेङ्गलूरु-नगरे एकः नूतनः वादविवादः आरब्धः। एकेन प्रवासि-भारतीयेन पञ्चाशीति-लक्षरूप्यकाणां वार्षिकवेतनस्य आयव्यय-पत्रकम् उपस्थापितम्। तत्र तेन केवलं लक्षमेकं रूप्यकाणि रक्षितुं शक्यते इति दर्शितम्।

## ॥ आचार्य-केशवराम-स्मृति-नमनम् ॥

शिष्यवत्सल-मूर्धन्य-विद्वद्वर्य-शिरोमणिः।विहाय स्थूलदेहं वै गतः स्वर्गं महामनाः॥गौरवं राष्ट्रियं ह्येषः कालिदासोऽभिनवः कृती।तस्य प्रयाण-वार्तेयम् करोति हृदयं हतम्॥सश्रद्धं विनता भूत्वा परिषद् वन्दते सदा।दिव्यलोके च पुण्यात्मा मोक्षं प्राप्नोतु शाश्वतम्॥ॐ दिवङ्गत-पुण्यात्मने नमः। शाश्वत-शान्तिः भवतु।

# युक्तिः तथा समाधानम्




श्रीमद्भगवद्गीतायाम् अर्जुनस्य युक्तिः, एवं भगवतः समाधानमेवमस्ति-

१) युद्धभूमौ अहं निमित्तं, लक्षणं च केवलं विपरीतं हि पश्यन्नस्मि।

-कर्मयोगी विपरीतं निमित्तलक्षणादिकं न अनुपश्यति। प्रत्युत स मद्भक्तः शुभाशुभादिषु परिस्थितिषु व्यापृतं रागद्वेषादिकं परित्यज्य तादृशीभ्यः परिस्थितिभ्यः अपि दूरीभूय च, स मत्कृपया सर्वविघ्नान् तरति।

२) अहं युद्धे स्वजनान् हत्वा परिणामे आत्मकल्याणं न पश्यामि।

-क्षत्रियार्थं धर्ममययुद्धात् अतिरिच्य नान्यत् किमपि महत्तरं कल्याणकरं साधनं स्यात् लोके। युद्धे मरणमपि कल्याणकरमेव।

३) नाहं विजयम्, न राज्यं, न च सुखं हि इच्छामि।

-त्वं कामनारहितो भूत्वा, जयपराजयौ, लाभहानी, सुखदुःखे चेति द्वन्द्वेभ्यः बहिरागत्य युद्धं कुर्याः।

४) अहं यदर्थं राज्यं, भोगं, सुखादिकं इच्छामि, तदर्थं हि एते मरणार्थम् अत्र सन्नद्धाः सन्ति।

- त्वं सम्पूर्णकर्म मयि समर्प्य सन्ताप-ममतादिभिः रहितो भूत्वा युद्धं कुरु। यः सम्पूर्णं कामना- स्पृहा- अहन्ता- ममतादिकं परित्यक्तुं शक्नोति, स हि शान्तिं लभते।

५) युद्धे धृतराष्ट्रस्य एतान् स्वजनान् हत्वा अस्माकं कुतः प्रसन्नता, नैव सर्वथा।

- प्रसन्नता तु युद्धस्य करणे अकरणे वा न भवति, प्रत्युत रागद्वेषादिभिः रहितो भूत्वा, वशीभूतेन्द्रियैः कृताद् व्यवहारात् हि सम्भवति।

६) युद्धे एतेषां कुटुम्बिनान् हननेन तु वयं पापभागिनो हि भवेम।

- यदि त्वम् एतत् स्वतःप्राप्तं धर्ममयं युद्धं न कुर्याः, तर्हि त्वं हि पापभागी भूयाः।

७) युद्धे स्वजनान् हत्वा वयं कथं वा सुखिनो भवेम?

- येषां क्षत्रियाणां कृते अनायाशो हि एतादृशो धर्ममयो युद्धावकाशः पुरतः आयाति, यदि अस्य अवकाशस्य सदुपयोगः क्रियेत, तर्हि एव ते क्षत्रियाः सुखिनो भवेयुः, नान्यथा।

८) वयं कुलनाशस्य दोषं सम्यक् जानीमः, तस्मात् युद्धात् निवृत्तिः हि वरा भवेत्।

- तव नपुंसकता अस्तीयम्, कायरता, तथा तुच्छहृदयदुर्बलता च।

नैव एतद् ग्राह्यं त्वया, नोचितञ्च। तस्मादेतत् मनोदौर्बल्यं परित्यज्य तथा स्वकर्तव्यस्य पालनाय सत्वरम् उत्तिष्ठ।

९) युद्धं क्रियते चेत् परिणामे धर्मस्य नाशो भवेत्।

- क्षत्रियैः युद्धं न क्रियते चेदेव धर्मनाशो सम्भवेत्।

१०) युद्धं क्रियेत चेत् वर्णसङ्करता उत्पद्येत, यस्मात् पितृणां पतनं जायेत।

-यद्यहं सावधानतया स्वकर्तव्यस्य पालनं न कुर्यां, तदा अहमेव सङ्करतायाः जनयिता भवेयम्। कर्तव्यकर्मणः अवहेलनं नाम वर्णसङ्करतायाः उत्पादनम्।

११) युद्धपरिणामः तु नरकवासः एव।

- कर्तव्यकर्मरूपं युद्धं स्वर्गप्रदं भवति, न वा नरकप्रदम्।

१२) वयं लोभात् महापापकर्मार्थम् उद्युक्ताः, पूर्णतः प्रवृत्ताः च अधुना।

- कामरूपो लोभोऽयं त्यजनीयः, यतोहि अयमेव मनुष्यस्य परमशत्रुः, पापकर्मणः च मुख्यकारणमस्ति इति।

# हरिद्वारे ब्यावरः प्रकाशते, राष्ट्रिययुवा साहसिक शिबिरं सम्पूर्णम्



**हिमसंस्कृतवार्ताः- आचार्यः बी. एल. बधाला (योग शिक्षकः)** भारतस्काउट एण्ड गाइड्स राष्ट्रियमुख्यालयस्य नवदिल्ली इत्यस्य आश्रयेण आयोजितस्य राष्ट्रिययुवासाहसिककार्यक्रमस्य हरिद्वारस्य रायवालारेलस्थाने स्काउट-गाइड-प्रशिक्षणकेन्द्रे सफलतया समापनम् अभवत्। अस्मिन् प्रतिष्ठिते राष्ट्रियशिबिरे ब्याबरः मण्डलस्य चत्वारिंशत् प्रतिभागिनः असाधारणतया उत्तमं प्रदर्शनं कृतवन्तः, येन देशे सर्वत्र मण्डलस्य गौरवः प्राप्तः। सहायक राज्यायुक्तविमलचौहान इत्यनेन उक्तं यत् राजस्थानस्य ७२ चयनितप्रतिभागिनां मध्ये केवलं ब्याबरः मण्डलस्य ४० प्रतिभागिनां सहभागिता मण्डलस्य कृते गौरवस्य विषयः अस्ति। सः अपि अवदत् यत् भारतस्काउट एण्ड गाइड्स केवलं संस्था न, अपि तु जीवनमूल्यानां, अनुशासनस्य, नेतृत्वस्य, सेवायाः, संस्कृते च शक्तिशाली विद्यालयः अस्ति। एतादृशेषु राष्ट्रिय-साहसिक- कार्यक्रमेषु आत्मविश्वासः, नेतृत्वकौशलं, देशभक्तिः, साभावनया सह, युवानां प्रतिकूलपरिस्थितौ कार्यं कर्तुं क्षमता च विकसिता भवति प्राकृतिकवातावरणे आह्वानानां प्रत्यक्षीकरणं युवानः आत्मनिर्भरतां प्राप्तुं, दलभावनायाः सह कार्यं कर्तुं शिक्षितुं च सहायकाः भवन्ति। ब्याबरमण्डले दलस्य नेतृत्व माननीयाध्यक्षः मोहनसिंहचौहानः कृतवान्। अमनमहोदयः- कमलमहोदयौ पर्यवेक्षणे शिबिरं संचालितम्। शिविरस्य कालखण्डे प्रतिभागिनः हरिद्वार, केदारनाथ, बद्रीनाथ, देवप्रयाग, भारतस्य प्रथमग्रामः माना इत्यादीनां अनेकधार्मिक- ऐतिहासिक- सांस्कृतिकस्थलानां दर्शनं कृतवन्तः साहसिकक्रियाकलापाः, नेतृत्वविकासः, पदयात्रा, सामुदायिकजीवनं, सेवाक्रियाकलापाः च इत्येतयोः माध्यमेन व्यावहारिकप्रशिक्षणमपि गृहीतवन्तः। सुमितकुमार फौजदारः, बगदारामसेनः, हनुमानप्रसाद वैष्णव, अम्बदास वैष्णव, दिलीपसिंहः, ओमप्रकाशः, विजयालक्ष्मी रानावतः, सुमितदर्जी, अक्षतदर्जी, जितेन्द्रकुमारः, मनोजकुमारः, गोविन्दसिंहः, विष्णुकुमारः वर्मा, राजेशसोगरा, दर्शितसोगरा, भैरूलालः, जमना, संतोषदेवी, गौरवचौहानः, नरेन्द्रसिंहः, सरोजरावतः, शोभावैष्णव, सुमित्रागोयलः, वंदनाचौहान, रेखाजनगलः, दीपिकासोगरा, संताकुमारी, विद्या, ममतासोगरा, वर्षागहलोत, निशासोगरा, बंटी, ममतासेन, उर्मिलामीना, लक्ष्मीदेवी, बीनादेवी, एवं अन्य प्रतिभागी ब्याबरः शिबिरे सक्रियरूपेण भागं गृहीतवान्। शिविरस्य समापनसमये सर्वे प्रतिभागिनः भारतस्काउट एण्ड गाइड्स राष्ट्रियमुख्यालयं, नवदिल्ली, शिविरप्रभारी अमनमहोदयः, कमलमहोदयः, सम्पूर्णं प्रशिक्षणदलं प्रति आभारं प्रकटितवन्तः यत् शिबिरम् एकं प्रेरणादायकं, ज्ञानवर्धकं, अविस्मरणीयः च अनुभवः अभवत् इति। प्रशिक्षणेन तेषु साहसम्, आत्मविश्वासः, अनुशासनं, नेतृत्वकौशलं, राष्ट्रसेवायाः कृते नवीनशक्तिः च प्रवर्तिता, येन भविष्ये समाजस्य राष्ट्रस्य च निर्माणे अधिकाधिकं प्रभावी भूमिकां निर्वहियितुं प्रेरिताः। - **विष्णुकुमारवर्मा, भारत स्काउट्स एंड गाइड्स)**

# श्रीरामजन्मभूमितीर्थक्षेत्रट्रस्ट-संस्थया चम्पतराय- अनिलमिश्रयोः त्यागपत्राणि स्वीकृतानि



श्रीरामजन्मभूमितीर्थक्षेत्रट्रस्ट-संस्थया महासचिवस्य चम्पतरायस्य न्यासिनः (ट्रस्टी) अनिलमिश्रस्य च त्यागपत्राणि आधिकारिकरूपेण स्वीकृतानि सन्ति। श्रीरामजन्मभूमितीर्थक्षेत्रस्य कोषाध्यक्षः स्वामी गोविन्ददेवगिरिमहाराजः अद्य अस्मिन् विषये वक्तव्यं प्रसारितवान्। वक्तव्ये कथितं यत् त्यागपत्रेषु अग्रिमायाम् उपवेशने (बैठक) चर्चा भविष्यति। सः एतदपि आश्वासनं दत्तवान् यत् दानरूपेण प्राप्तानां रजत-इष्टिकानां (चाँदी की ईंटें) आभूषणानां च सम्पूर्णं लेखाजोखा (विवरणं) सुरक्षितम् अस्ति।अयोध्यारामन्दिरे सम्प्रति घटिताभिः घटनाभिः ट्रस्ट-संस्था अतीव दुःखिता, आहिता, उद्विग्ना च अस्ति। ट्रस्ट-संस्थया एतदपि प्रमाणीकृतं यत् दानसम्बन्धिते विषये 'एस०आई०टी०' (SIT) अन्वेषणस्य अन्तरिम-प्रतिवेदनस्य (रिपोर्ट) आधारेण प्राथमिकी (FIR) पञ्जीकृता अस्ति, न्यायिका (कानूनी) प्रक्रिया च प्रचलति।